# ॥ व्यासाष्टोत्तरशतनामस्तोत्रम् ॥

नारायणकुलोद्भूतो नारायणपरो वरः।
नारायणावतारश्च नारायणवशंवदः ॥ १ ॥

स्वयम्भूवंशसम्भूतो वसिष्ठकुलदीपकः।
शक्तिपौत्रः पापहन्ता पराशरसुतोऽमलः ॥ २ ॥

द्वैपायनो मातृभक्तः शिष्टः सत्यवतीसुतः।
स्वयमुद्भूतवेदश्च चतुर्वेदविभागकृत् ॥ ३ ॥

महाभारतकर्ता च ब्रह्मसूत्रप्रजापतिः।
अष्टादशपुराणानां कर्ता श्यामः प्रशिष्यकः ॥ ४ ॥

शुकतातः पिङ्गजटः प्रांशुर्दण्डी मृगाजिनः।
वश्यवाग् ज्ञानदाता च शङ्करायुःप्रदः शुचिः ॥ ५ ॥

मातृवाक्यकरो धर्मी कर्मी तत्त्वार्थदर्शकः।
सञ्जयज्ञानदाता च प्रतिस्मृत्युपदेशकः ॥ ६ ॥

सर्वधर्मोपदेष्टा च मृतदर्शनपण्डितः।
विचक्षणः प्रहृष्टात्मा पर्वपूज्यः प्रभुर्मुनिः ॥ ७ ॥

वीरो विश्रुतविज्ञानः प्राज्ञश्चाज्ञाननाशनः।
ब्राह्मकृत् पाद्मकृद् धीरो विष्णुकृच्छिवकृत् तथा ॥ ८ ॥

श्रीभागवतकर्ता च भविष्यरचनादरः।
नारदाख्यस्य कर्ता च मार्कण्डेयकरोऽग्निकृत् ॥ ९ ॥

ब्रह्मवैवर्तकर्ता च लिङ्गकृच्च वराहकृत्।
स्कान्दकर्ता वामनकृत् कूर्मकर्ता च मत्स्यकृत् ॥ १० ॥

गरुडाख्यस्य कर्ता च ब्रह्माण्डाख्यपुराणकृत्।
उपपुराणानां कर्ता पुराणः पुरुषोत्तमः ॥ ११ ॥

काशिवासी ब्रह्मनिधिर्गीतादाता महामतिः।
सर्वज्ञः सर्वसिद्धिश्च सर्वशास्त्रप्रवर्तकः ॥ १२ ॥

सर्वाश्रयः सर्वहितः सर्वः सर्वगुणाश्रयः।
विशुद्धः शुद्धिकृद् दक्षो विष्णुभक्तः शिवार्चकः ॥ १३ ॥

देवीभक्तः स्कन्दरुचिर्गणेशाद्दृच्च योगवित्।
पैलाचार्य ऋचः कर्ता शाकल्यार्यश्च याजुषः॥ १४॥

जैमिन्यार्यः सामकर्ता सुमन्त्वार्योऽप्यथर्वकृत्।
रोमहर्षणसूतार्यो लोकाचार्यो महामुनिः॥ १५॥

व्यासकाशीरतिर्विश्वपूज्यो विश्वेशपूजकः।
शान्तः शान्ताकृतिः शान्तचित्तः शान्तिप्रदस्तथा॥ १६॥

॥ इति व्यासाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Vyasa_Ashtottara_Shatanama_Stotram.
generated on **August 23, 2026**
Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits